॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## सप्तमकाण्डे प्रथमः प्रश्नः

### अश्वमेधगतमन्त्राणामभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

प्र॒जन॑न॒ञ्ज्योति॑र॒ग्निर्दे॒वता॑ना॒ञ्ज्योति॑र्वि॒राट् छन्द॑सा॒ञ्ज्योति॑र्वि॒राड् वा॒चो᳚ऽग्नौ सन्ति॑ष्ठते वि॒राज॑-
म॒भि संप॑द्यते॒ तस्मा॒त् तज्ज्योति॑रुच्यते॒ द्वौ स्तोमौ᳚ प्रातस्सव॒नँव्व॑ह॒तो यथा᳚ प्रा॒णश्चा॑ऽपा॒नश्च॒ द्वौ
माद्ध्य॑न्दि॒न॒ꣳ सव॑न॒य्ँय्यथा॒ चक्षु॑श्च॒ श्रोत्र॑ञ्च॒ द्वौ तृ॑तीयसव॒नय्ँय्यथा॒ वाक् च॑ प्रति॒ष्ठा च॒ पुरु॑षसंमितो॒
वा ए॒ष य॒ज्ञोऽस्थू॒रि ॥ [१] ॥ यङ्का॒मङ्का॑मय॑ते॒ तमे॒तेना॒भ्य॑श्नुते॒ सर्व॒ꣳ॒ ह्य॑स्थू॒रिणाऽभ्य॒श्नुते᳚ऽग्नि-
ष्टो॒मेन॒ वै प्र॒जाप॑तिः प्र॒जा अ॑सृजत॒ ता अ॑ग्निष्टो॒मेनै॒व पर्य॑गृह्णा॒त् तासा॒म्परि॑गृहीतानामश्वत॒रोऽत्य॑-
प्रवत॒ तस्या॑नु॒हाय॒रेत॒ आऽद॑त्त॒ तद्गर्द॑भे॒ न्य॑मा॒र्ट् तस्मा᳚द्गर्द॒भो द्वि॒रेता॒ अथो॑ आहु॒र्वड॑बाया॒न्न्य॑मा॒-
र्डिति॒ तस्मा॒द्वड॑बा द्वि॒रेता॒ अथो॑ आहु॒रोष॑धीषु॒ ॥ [२] ॥ न्य॑मा॒र्डिति॒ तस्मा॒दोष॑ध॒योऽन॑भ्यक्ता
रे॒भन्त्यथो॑ आहुः प्र॒जासु॒ न्य॑मा॒र्डिति॒ तस्मा᳚द्य॒मौ जा॑येते॒ तस्मा॑दश्वत॒रो न प्र जा॑यत॒ आत्त॑रेता॒
हि तस्मा᳚द् ब॒र्॒हिष्यन॑वक्लृप्तः सर्व॑वेद॒से वा॑ स॒हस्रे॒ वाऽव॑ क्लृ॒प्तोऽति॒ ह्यप्र॑वत॒ य ए॒वँव्वि॒द्वान॑ग्निष्टो॒-
मेन॒ यज॑ते॒ प्राजा॑ताः प्र॒जा ज॒नय॑ति॒ परि॒ प्रजा॑ता गृह्णाति॒ तस्मा॑दाहुर्ज्यैष्ठय॒ज्ञ इति॑ ॥ [३] ॥
प्र॒जाप॑ति॒र्वाव ज्ये॒ष्ठः स ह्ये॒तेनाग्रेऽय॑जत प्र॒जाप॑तिरकामयत॒ प्र जा॑ये॒येति॒ स मु॑ख॒तस्त्रि॒वृत॒न्निर॑-
मिमीत॒ तम॒ग्निर्दे॒वताऽन्व॑सृज्यत गाय॒त्री छन्दो॑ रथन्त॒रꣳ साम॑ ब्राह्म॒णो म॑नु॒ष्या॑णाम॒जः प॑शू॒ना-
न्तस्मा॒त् ते मुख्या॑ मुख॒तो ह्यसृ॑ज्य॒न्तोर॑सो बा॒हुभ्या᳚म्पञ्चद॒शन्निर॑मिमीत॒ तमिन्द्रो॑ दे॒वताऽन्व॑सृ-
ज्यत त्रि॒ष्टुप् छन्दो॑ बृ॒हथ् ॥ [४] ॥ साम॑ राज॒न्यो॑ मनु॒ष्या॑णा॒मविः॑ पशू॒नान्तस्मा॒त् ते वी॒र्या॑-
वन्तो वी॒र्या᳚द्ध्यसृ॑ज्यन्त मद्ध्य॒तः स॑प्तद॒शन्निर॑मिमीत॒ तँव्विश्वे॑ दे॒वा दे॒वता॒ अन्व॑सृज्यन्त॒ जग॑ती॒

छन्दो वै रूपꣳ साम वैश्यो मनुष्याणाङ्गावः पशूनान्तस्मात् त आद्या अन्नधानाद्ध्य सृज्यन्त तस्माद् भूयाꣳसोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त पत्त एकविꣳ शन्निरमिमीत तमनुष्टुप् छन्दो ॥ [५] ॥ ऽन्वसृज्यत वैराजꣳ साम शूद्रो मनुष्याणामश्वः पशूनान्तस्मात् तौ भूतसङ्क्रामिणावश्वश्च शूद्रश्च तस्माँच्छूद्रो यज्ञेऽनवक्लृप्तो न हि देवता अन्वसृज्यत तस्मात् पादावुप जीवतः पत्तो ह्यसृज्येताम्प्राणा वै त्रिवृदर्धमासाः पञ्चदशः प्रजापतिः सप्तदशस्त्रय इमे लोका असावादित्य एकविꣳश एतस्मिन् वा एते श्रिता एतस्मिन् प्रतिष्ठिता य एवँव्वेदैतस्मिन्नेव श्रयत एतस्मिन् प्रति तिष्ठति ॥ [६] ॥

(अस्थूरि रोषधीषु ज्येष्ठयज्ञ इति बृह दनुष्टुप् छन्दः प्रतिष्ठिता नव च) ॥ १ ॥

प्रातस्सवने वै गायत्रेण छन्दसा त्रिवृते स्तोमाय ज्योतिर्दधदेति त्रिवृता ब्रह्मवर्चसेन पञ्चदशाय ज्योतिर्दधदेति पञ्चदशेनौजसा वीर्येण सप्तदशाय ज्योतिर्दधदेति सप्तदशेन प्राजापत्येन प्रजननेनैकविꣳशाय ज्योतिर्दधदेति स्तोम एव तथ् स्तोमाय ज्योतिर्दधदेत्यथो स्तोम एव स्तोममभि प्र णयति यावन्तो वै स्तोमास्तावन्तः कामास्तावन्तो लोका स्तावन्ति ज्योतीꣳष्येतावत एव स्तोमानेतावतः कामानेतावतो लोकानेतावन्ति ज्योतीꣳष्यव रुन्धे ॥ [७] ॥

(तावन्तो लोका स्त्रयोदश च) ॥ २ ॥

ब्रह्मवादिनो वदन्ति स त्वै यजेत योँऽग्निष्टोमेन यजमानोऽथ सर्वस्तोमेन यजेतेति यस्य त्रिवृतमन्तर्यन्ति प्राणाꣳस्तस्यान्तर्यन्ति प्राणेषु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य पञ्चदशमन्तर्यन्ति वीर्यन्तस्यान्तर्यन्ति वीर्ये मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य सप्तदशमन्तर्यन्ति ॥ [८] ॥ प्रजान्तस्यान्तर्यन्ति प्रजायाम्मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्यैकविꣳशमन्तर्यन्ति प्रतिष्ठान्तस्यान्तर्यन्ति प्रतिष्ठायाम्मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यस्य त्रिणवमन्तर्यन्त्यृतूꣳश्च तस्य नक्षत्रियाञ्च विराजमन्तर्यन्त्यृतुषु मेऽप्यसन्नक्षत्रियायाञ्च विराजीति ॥ [९] ॥ खलु वै यज्ञेन यजमानो यजते यस्य त्रयस्त्रिꣳशमन्तर्यन्ति देवतास्तस्यान्तर्यन्ति देवतासु मेऽप्यसदिति खलु वै यज्ञेन यजमानो यजते यो वै

स्तोमानामवमम्परमताङ्गच्छन्तव्वेँद परमतामेव गच्छति त्रिवृद्वै स्तोमानामवमस्त्रिवृत् परमो य एवव्वेँद परमतामेव गच्छति ॥ [१०] ॥

(सप्तदशमन्तर्यन्ति विराजीति चतुश्चत्वारिꣳशच्च) ॥ ३ ॥

अङ्गिरसो वै सत्रमासत ते सुवर्गँल्लोकमायन् तेषाꣳ हविष्माꣳश्च हविष्कृच्चाऽहीयेतान्तावकामयेताꣳ सुवर्गँल्लोकमियावेति तावेतन्द्विरात्रमपश्यतान्तमाऽहरतान्तेनायजेतान्ततो वै तौ सुवर्गँल्लोकमैताय्यँ एवव्विँद्वान् द्विरात्रेण यजते सुवर्गमेव लोकमेति तावैताम्पूर्वेणाह्नाऽगच्छतामुत्तरेणा ॥ [११] ॥ भिप्लवः पूर्वमहर्भवति गतिरुत्तरञ्ज्योतिष्टोमोऽग्निष्टोमः पूर्वमहर्भवति तेजस्तेनाव रुन्धे सर्वस्तोमोऽतिरात्र उत्तरꣳ सर्वस्याऽऽ*प्त्यै सर्वस्याऽवरुद्ध्यै गायत्रम्पूर्वेऽहन्थ्साम भवति तेजो वै गायत्री गायत्री ब्रह्मवर्चसन्तेज एव ब्रह्मवर्चसमात्मन् धत्ते त्रैष्टुभमुत्तर ओजो वै वीर्यन्त्रिष्टुगोज एव वीर्यमात्मन् धत्ते रथंतरम्पूर्वे ॥ [१२] ॥ ऽहन्थ् साम भवतीयव्वै रथन्तरमस्यामेव प्रति तिष्ठति बृहदुत्तरेऽसौ वै बृहदमुष्यामेव प्रति तिष्ठति तदाहुः क्व जगती चाऽनुष्टुप् चेति वैखानसम्पूर्वेऽहन्थ् साम भवति तेन जगत्यै नैति षोडश्युत्तरे तेनानुष्टुभोऽथाऽऽ*हुर्यथ् समानेऽर्धमासे स्यातामन्यतरस्याह्नो वीर्यमनु पद्येतेत्यमावास्यायाम्पूर्वमहर्भवत्युत्तरस्मिन्नुत्तरं नानैवाऽर्धमासयोर्भवतो नानावीर्ये भवतो हविष्मन्निधनम्पूर्वमहर्भवति हविष्कृन्निधनमुत्तरम्प्रतिष्ठित्यै ॥ [१३] ॥

(उत्तरेण रथन्तरम्पूर्वे ऽन्वे कविꣳशतिश्च) ॥ ४ ॥

आपो वा इदमग्रे सलिलमासीत् तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरथ् स इमामपश्यत् ताव्वँराहो भूत्वाऽहरत् ताव्विँश्वकर्मा भूत्वा व्यमार्ट्थ् साऽप्रथत सा पृथिव्यभवत् तत् पृथिव्यै पृथिवित्वन्तस्यामश्राम्यत् प्रजापतिः स देवानसृजत वसून् रुद्रानादित्यान् ते देवाः प्रजापतिमब्रुवन् प्रजायामहा इति सोऽब्रवीद् ॥ [१४] ॥ यथाऽहय्यँुष्माꣳस्तपसाऽसृक्ष्येवन्तपसि प्रजननमिच्छद्ध्वमिति तेभ्योऽग्निमायतनम्प्राऽयच्छदेतेनाऽऽ*यतनेन श्राम्यतेति तेऽग्निनाऽऽ*यतनेनाऽश्राम्यन् ते संव्वँथ्सर एकाङ्गामसृजन्त ताव्वँसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राऽयच्छन्नेताꣳ

रक्षद्ध्वमिति ताँव्वसवो रुद्रा आदित्या अरक्षन्त सा वसुभ्यो रुद्रेभ्य आदित्येभ्यः प्राजायत त्रीणि च ॥ [१५] ॥ शतानि त्र्यस्त्रिꣳशतञ्चाथ सैव सहस्रतम्यभवत् ते देवाः प्रजापतिमब्रुवन्थ् सहस्रेण नो याजयेति सोऽग्निष्टोमेन वसूनयाजयत् त इमँल्लोकमजयन् तच्चाददुः स उक्थ्येन रुद्रानयाजयत् तेऽन्तरिक्षमजयन् तच्चाददुः सोऽतिरात्रेणाऽऽ*दित्यानयाजयत् तेऽमुँल्लोकमजयन् तच्चाददु स्तदन्तरिक्ष ॥ [१६] ॥ वँव्यवैर्यत तस्माद्रुद्रा घातुका अनायतना हि तस्मादाहुः शिथिलव्वै मद्ध्यममहस्त्रिरात्रस्य वि हि तद्वैर्यतेति त्रैष्टुभम्मद्ध्यमस्याह्न आज्यम्भवति सँय्यानानि सूक्तानि शꣳसति षोडशिनꣳ शꣳसत्यह्नो धृत्या अशिथिलंभावाय तस्मात् त्रिरात्रस्याग्निष्टोम एव प्रथममहः स्यादथोक्थ्योऽथाऽतिरात्र एषाँल्लोकानाव्विधृत्यै त्रीणित्रीणि शतान्यनूचीनाहमव्यवच्छिन्नानि ददा ॥ [१७] ॥ त्येषाँल्लोकानामनु सन्तत्यै दशतन्न विच्छिन्द्याद्विराजन्नेद्विच्छिनदानीत्यथ या सहस्रतम्यासीत् तस्यामिन्द्रश्च विष्णुश्च व्यायच्छेताꣳ स इन्द्रोऽमन्यतानया वा इदँव्विष्णुः सहस्रँव्वर्क्ष्यत इति तस्यामकल्पेतान्द्विभाग इन्द्रस्तृतीये विष्णुस्तद्वा एषाऽभ्यनूच्यत उभा जिग्यथुरिति ताँव्वा एतामच्छावाक ॥ [१८] ॥ एव शꣳसत्यथ या सहस्रतमी सा होत्रे देयेति होतारँव्वा अभ्यतिरिच्यते यदतिरिच्यते होताऽनाप्तस्याऽऽ*पयिताऽथाऽ*हुरुन्नेत्रे देयेत्यतिरिक्ता वा एषा सहस्रस्यातिरिक्त उन्नेतर्त्विजामथाऽऽ*हुः सर्वेभ्यः सदस्येभ्यो देयेत्यथाऽऽहुरुदा कृत्या सा वशञ्चरेदित्यथाऽऽ*हुर्ब्रह्मणे चाग्नीधे च देयेति ॥ [१९] ॥ द्विभागम्ब्रह्मणे तृतीयमग्नीध ऐन्द्रो वै ब्रह्मा वैष्णवोऽग्नीद्यथैव तावकल्पेतामित्यथाऽऽ*हुर्या कल्याणी बहुरूपा सा देयेत्यथाऽऽ*हुर्या द्विरूपोभयतएनी सा देयेति सहस्रस्य परिगृहीत्यै तद्वा एतथ् सहस्रस्याऽयनꣳ सहस्रꣳ स्तोत्रीयाः सहस्रन्दक्षिणाः सहस्रसम्मितः सुवर्गो लोकः सुवर्गस्य लोकस्याभिजित्यै ॥ [२०] ॥

(अब्रवी च तदन्तरिक्षं ददात्य च्छावाक श्च देयेति सप्तचत्वारिꣳशच्च) ॥ ५ ॥

सोमो वै सहस्रमविन्दत् तमिन्द्रोऽन्वविन्दत् तौ यमो न्यागच्छत् तावब्रवीदस्तु मेऽत्राऽपीत्यस्तु ही(३) इत्यब्रूताꣳ स यम एकस्याँव्वीर्यम्पर्यपश्यदियँव्वा अस्य सहस्रस्य वीर्यम्बिभर्तीति तावब्रवीदियम्ममास्त्वेतद्युवयोरिति तावब्रूताꣳ सर्वे वा एतदेतस्याँव्वीर्यं ॥ [२१] ॥ परि

प॒श्या॒मोऽꣳशा॒मा ह॑रामहा॒ इति॒ तस्या॒मꣳशा॒माऽह॑रन्त॒ ता॒म॒प्सु प्राऽवे॑शय॒न्थ्सोमा॑यो॒देही॒ति॒ सा रोहि॑णी पि॒ङ्गलै॑कहायनी रू॒पङ्कृ॒त्वा त्रय॑स्त्रिꣳशता च त्रि॒भिश्च॑ श॒तैः स॒होदै॑त् तस्मा॒द्रोहि॑ण्या पि॒ङ्ग-लयै॑कहायन्या॒ सोम॑ङ्क्रीणीया॒द्य ए॒वव्ँ॑वि॒द्वान् रोहि॑ण्या पि॒ङ्गलयै॑कहायन्या॒ सोम॑ङ्क्रीणा॒ति॒ त्रय॑स्त्रिꣳ-शता चै॒वास्य॑ त्रि॒भिश्च॑ ॥ [२२] ॥ श॒तैः सोम॑ः क्री॒तो भ॑वति॒ सु॒क्रीते॑न यजते॒ ता॒म॒प्सु प्रावे॑श-य॒न्निन्द्रा॑यो॒देही॒ति॒ सा रोहि॑णी ल॒क्ष्म॒णा प॑ष्ठौ॒ही वा᳚र्त्र॒घ्नी रू॒पङ्कृ॒त्वा त्रय॑स्त्रिꣳशता च त्रि॒भिश्च॑ श॒तैः स॒होदै॑त् तस्मा॒द् रोहि॑णील्ँ ल॒क्ष्म॒णाम्प॑ष्ठौ॒हीव्ँ वा᳚र्त्र॒घ्नीन्द॒द्या॒द्य ए॒वव्ँ॑वि॒द्वान् रोहि॑णील्ँ ल॒क्ष्म॒-णाम्प॑ष्ठौ॒हीव्ँ वा᳚र्त्र॒घ्नीन्द॒दा॑ति॒ त्रय॑स्त्रिꣳशच्चै॒वास्य॒ त्रीणि॑ च श॒ता॒नि॒ सा द॒त्ता ॥ [२३] ॥ भ॑वति॒ ता॒म॒प्सु प्रावे॑शय॒न् य॒मायो॒देही॒ति॒ सा जर॑ती मू॒र्खा त॑ज्ज॒घन्या रू॒पङ्कृ॒त्वा त्रय॑स्त्रिꣳशता च त्रि॒भिश्च॑ श॒तैः स॒होदै॑त् तस्मा॒ज्जर॑तीम्मू॒र्खान्त॑ज्ज॒घन्या॒म॑नु॒स्तर॑णीङ्कुर्वी॒त॒ य ए॒वव्ँ॑वि॒द्वाञ्जर॑तीम्मू॒र्खान्त॑ज्ज॒घ॒-न्याम॑नु॒स्तर॑णीङ्कु॒रु॒ते त्रय॑स्त्रिꣳशच्चै॒वास्य॒ त्रीणि॑ च श॒ता॒नि॒ साऽमुष्मि॑ल्ँलो॒के भ॑वति॒ वाग॒ेव स॑ह-स्र॒तमी॒ तस्मा॒ ॥ [२४] ॥ द्व॒रो॒ दे॒यः सा हि व॑रः स॒हस्र॑मस्य॒ सा द॒त्ता भ॑वति॒ तस्मा॒द् व॒रो॒ न प्र॑ति॒गृ॒ह्यः सा हि व॑रः स॒हस्र॑मस्य॒ प्रति॑गृहीतम्भवती॒यव्ँ व॒र॒ इति॑ ब्रू॒याद॒था॒न्याम्ब्रू॑या॒दि॒यम्म॒मेति॒ तथा᳚ऽस्य॒ तथ् स॒ह॒स्र॒मप्र॑तिगृहीतम्भवत्युभयत॒एनी स्या॒त् तदा॑हुरन्यत ए॒नी स्या᳚थ् स॒हस्र॑म्प॒र-स्ता॒दे॒तमि॒ति॒ यैव व॑रः ॥ [२५] ॥ क॒ल्या॒णी रू॒पस॑मृद्धा॒ सा स्या॒थ् सा हि व॒रः सम॑ृद्ध्यै॒ तामु-त्त॑रे॒णाऽऽ*ग्नी᳚द्ध्रम्पर्या॒णीया॑ऽऽ*ह॒व॒नी॒यस्या॒न्ते᳚ द्रो॒णक॒लश॒मव॑ घ्रापये॒दा जि॑घ्र क॒लश॑म्मह्यु॒रु-धा॑रा॒ पय॑स्व॒त्या त्वा॑ वि॒श॒न्त्विन्द॑वः समु॒द्रमि॑व॒ सिन्ध॑वः सा मा॑ स॒ह॒स्र आ भ॑ज प्र॒जया॑ प॒शुभि॑ः स॒ह पु॒नर्मा॑ऽऽ*वि॑शताद्र॒यिरि॑ति॑ प्र॒जयै॒वैन॑म्प॒शुभी॑ र॒य्या स ॥ [२६] ॥ म॑द्र्ध॑यति प्र॒जावा᳚न् प॒शुमा॒न् र॑यि॒मान् भ॑वति॒ य ए॒वव्ँवे॒द॒ तया॑ स॒हाऽऽ*ग्नी᳚द्ध्रम्प॒रेत्य॑ पु॒रस्ता᳚त् प्र॒तीच्या॒न्तिष्ठ॑न्त्या-ञ्जुहुया॒दु॒भा जि॑ग्यथु॒र्न परा॑ जये॒थे॒ न परा॑ जिग्ये क॒तर॒श्च॒नैनो᳚ः। इन्द्र॑श्च विष्णो॒ यदप॑स्पृधेथा॒न्त्रे॒धा स॒हस्र॒व्ँ वि तदै॑रयेथा॒मिति॑, त्रे॒धाविभ॒क्तव्ँ वै त्रि॑रा॒त्रे स॒हस्र॑ꣳ साह॒स्रीमे॒वैना᳚ङ्करोति स॒हस्र॑स्यै॒वैना॒-म्मात्रा᳚ ॥ [२७] ॥ करोति रू॒पाणि॑ जुहोति रू॒पैरे॒वैना॒ꣳ सम॑द्र्धयति॒ तस्या॑ उपो॒त्थाय॒ कर्ण॒मा ज॑पे॒दिडे॒ रन्तेऽदि॑ते॒ सर॑स्वति॒ प्रिये॒ प्रेय॑सि॒ महि॒ विश्रु॒त्ये॒ताानि॑ ते अघ्निये॒ नामा॑नि सु॒कृत॑म्मा दे॒वेषु॑ ब्रू॒तादिति॑ दे॒वेभ्य॑ ए॒वैन॒मा वे॑द॒यत्यन्वे॑नन्दे॒वा बु॑द्ध्यन्ते ॥ [२८] ॥

(मेका॒न्नच॑त्वारि॒ꣳशच्च॑) ॥ ६ ॥

सहस्रतम्या वै यजमानः सुवर्गँल्लोकमेति सैनꣳ सुवर्गँल्लोकङ्गमयति सा मा सुवर्गँल्लो-
कङ्गमयेत्याह सुवर्गमेवैनँल्लोकङ्गमयति सा मा ज्योतिष्मन्तँल्लोकङ्गमयेत्याह ज्योतिष्मन्तमेवै-
नँल्लोकङ्गमयति सा मा सर्वान् पुण्याँल्लोकान् गमयेत्याह सर्वानेवैनम्पुण्याँल्लोकान् गमयति
सा ॥ [२९] ॥ मा प्रतिष्ठाङ्गमय प्रजया पशुभिः सह पुनर्माऽऽविशताद्रयिरिति प्रजयैवैनम्प-
शुभी रय्याम्प्रति ष्ठापयति प्रजावान् पशुमान् रयिमान् भवति य एवँवेद तामग्नीधे वा ब्रह्मणे
वा होत्रे वोद्गात्रे वाऽद्ध्वर्यवे वा दद्याथ् सहस्रमस्य सा दत्ता भवति सहस्रमस्य प्रतिगृहीत-
म्भवति यस्तामविद्वान् ॥ [३०] ॥ प्रतिगृह्णाति ताम्प्रतिगृह्णीयादेकाऽसि न सहस्रमेकान्त्वा
भूताम्प्रति गृह्णामि न सहस्रमेका मा भूताऽऽविश मा सहस्रमित्येकामेवैनाम्भूताम्प्रतिगृह्णाति
न सहस्रय्यँ एवँवेद स्योनाऽसि सुषदा सुशेवा स्योना माऽऽविश सुषदा माऽऽविश सुशेवा
माऽऽविशे ॥ [३१] ॥ त्याह स्योनैवैनꣳ सुषदा सुशेवा भूताऽऽविशति नैनꣳ हिनस्ति ब्रह्म-
वादिनो वदन्ति सहस्रꣳ सहस्रतम्यन्वेती(३) सहस्रतमीꣳ सहस्रा(३)मिति यत् प्राचीमुथ् सृजेथ्
सहस्रꣳ सहस्रतम्यन्वियात् तथ् सहस्रमप्रज्ञात्रꣳ सुवर्गँल्लोकन्न प्र जानीयात् प्रतीचीमुथ् सृजति
ताꣳ सहस्रमनु पर्यावर्तते सा प्रजानती सुवर्गँल्लोकमेति यजमान मभ्युथ् सृजति क्षिप्रे सहस्रम्प्र
जायत उत्तमा नीयते प्रथमा देवान् गच्छति ॥ [३२] ॥

(लोकान् गमयति सा ऽविद्वान्थ् सुशेवा माऽऽविश यजमानं द्वादश च) ॥ ७ ॥

अत्रिरददादौर्वाय प्रजाम्पुत्रकामाय स रिरिचानोऽमन्यत निर्वीर्यः शिथिलो यातयामा स
एतञ्चतूरात्रमपश्यत् तमाऽहरत् तेनायजत ततो वै तस्य चत्वारो वीरा आऽजायन्त सुहोता
सूद्गाता स्वद्ध्वर्युः सुसभेयो य एवँविद्वाꣳश्चतूरात्रेण यजत आऽस्य चत्वारो वीरा जायन्ते
सुहोता सूद्गाता स्वद्ध्वर्युः सुसभेयो ये चतुर्विꣳशाः पवमाना ब्रह्मवर्चसन्त ॥ [३३] ॥ द्य
उद्यन्तः स्तोमाः श्रीः साऽत्रिꣳ श्रद्धादेवय्यँजमानञ्चत्वारि वीर्याणि नोपाऽनमन् तेज इन्द्रियम्ब्र-
ह्मवर्चसमन्नाद्यꣳ स एताꣳश्चतुरश्चतुष्टोमान्थ् सोमानपश्यत् तानाऽहरत् तैरयजत तेज एव प्रथ-
मेनाऽवारुन्धेन्द्रियन्द्वितीयेन ब्रह्मवर्चसन्तृतीयेनान्नाद्यञ्चतुर्थेन य एवँविद्वाꣳश्चतुरश्चतुष्टोमान्थ्

सोमा॑नाहर॑ति तैर्यज॑ते तेज॑ एव प्र॑थमेनाव॑ रुन्ध इन्द्रि॒यन्द्वि॒तीये॑न ब्रह्मवर्च॒सन्तृ॒तीये॑ना॒ऽन्नाद्य॑ञ्च॒तुर्थे॑न यामे॒वात्रि॑र्॒ऋद्धिमाद्ध्नो॑त् तामे॒व यज॑मान ऋद्ध्नोति ॥ [३४] ॥

(तत्तेज॑ ए॒वाष्टाद॑श च) ॥ ८ ॥

---

ज॒मद॑ग्निः पुष्टिकामश्चतू॒रात्रेणा॑यजत॒ स ए॒तान् पोषा॑ꣳ अपुष्यत् तस्मा॑त् पलि॒तौ जाम॑दग्नियौ॒ न सञ्जा॑नाते ए॒ताने॒व पोषा॑न् पुष्यति॒ य ए॒वव्ँवि॒द्वाꣳश्च॑तू॒रात्रेण॒ यज॑ते पुरोडा॒शिन्य॑ उप॒सदो॑ भवन्ति प॒शवो॑ वै पु॒रोडाशः॒ प॒शूने॒वाव॑ रु॒न्धेऽन्नव्वै॑ पु॒रोडाशोऽन्न॑मे॒वाव॑ रुन्धे ऽन्ना॒दः प॑शु॒मान् भ॑वति य ए॒वव्ँवि॒द्वाꣳश्च॑तू॒रात्रे॒ण यज॑ते ॥ [३५] ॥

(ज॒मद॑ग्नि र॒ष्टाच॑त्वारिꣳशत्) ॥ ९ ॥

---

स॒व्ँव॒थ्स॒रो वा इ॒दमेक॑ आसी॒थ् सो॑ऽकामयत॒र्तून्थ् सृ॒जेये॒ति स ए॒तम्प॑ञ्चरा॒त्रम॑पश्यत् तमाऽह॑र॒त् तेना॑यजत॒ ततो॒ वै स ऋ॒तूनसृजत॒ य ए॒वव्ँवि॒द्वान् प॑ञ्चरा॒त्रेण॒ यज॑ते॒ प्रैव जा॑यते॒ त ऋ॒तव॑ः सृ॒ष्टा न व्याव॑र्तन्त॒ त ए॒तम्प॑ञ्चरा॒त्रम॑पश्यन् तमाऽह॑र॒न् तेना॑यजन्त॒ ततो॒ वै ते व्याव॑र्तन्त॒ ॥ [३६] ॥ य ए॒वव्ँवि॒द्वान् प॑ञ्चरा॒त्रेण॒ यज॑ते॒ वि पा॒प्मना॒ भ्रातृ॑व्ये॒णाऽऽ* व॑र्तते॒ सार्व॑सेनिः शौचे॒यो॑ऽकामयत पशु॒मान्थ् स्या॑मिति॒ स ए॒तम्प॑ञ्चरा॒त्रमाऽह॑र॒त् तेना॑ऽयजत॒ ततो॒ वै स स॒हस्र॒म्पशू॒न् प्राऽऽ*प्नो॒द्य ए॒वव्ँवि॒द्वान् प॑ञ्चरा॒त्रेण॒ यज॑ते॒ प्र स॒हस्र॒म्पशू॒ना॑प्नोति॒ बब॒रः प्रावा॑ह॒णिरकामयत वा॒चः प्र॑वदि॒ता स्या॑मि॒ति स ए॒तम्प॑ञ्चरा॒त्रमा ॥ [३७] ॥ ऽह॑र॒त् तेना॑यजत॒ ततो॒ वै स वा॒चः प्र॑वदि॒ताऽभ॑व॒द्य ए॒वव्ँवि॒द्वान् प॑ञ्चरा॒त्रेण॒ यज॑ते प्रवदि॒तैव वा॒चो भ॑व॒त्यथो॑ ए॒नव्ँवा॒चस्प॒तिरि॒त्या॑हु॒रना॑प्तश्चतू॒रात्रो॑ऽतिरि॑क्तः ष॒ड्रात्रोऽथ॒ वा ए॒ष स॒म्प्रति य॒ज्ञो यत् प॑ञ्चरा॒त्रो य ए॒वव्ँवि॒द्वान् प॑ञ्चरा॒त्रेण॒ यज॑ते स॒म्प्रत्ये॒व य॒ज्ञेन॑ यजते पञ्चरा॒त्रो भ॑वति॒ पञ्च॒ वा ऋ॒तव॑ः स॒व्ँव॒थ्स॒र ॥ [३८] ॥ ऋ॒तुष्वे॒व स॑व्ँवथ्स॒रे प्रति॑ तिष्ठ॒त्यथो॒ पञ्चा॑क्षरा प॒ङ्क्तिः पाङ्क्तो॑ य॒ज्ञो य॒ज्ञमे॒वाव॑ रुन्धे त्रि॒वृद॑ग्निष्टो॒मो भ॑वति॒ तेज॑ ए॒वाव॑ रुन्धे पञ्चद॒शो भ॑वतीन्द्रि॒यमे॒वाव॑ रुन्धे सप्तद॒शो भ॑व॒त्यन्नाद्य॒स्याव॑रुद्ध्या॒ अथो॒ प्रैव तेन॑ जायते पञ्चवि॒ꣳशो॑ऽग्निष्टो॒मो भ॑वति प्र॒जाप॑तेरा॒प्त्यै॑ महाव्र॒तवा॑नन्ना॒द्यस्याव॑रुद्ध्यै वि॒श्वजि॒थ् सर्व॑पृष्ठोऽतिरा॒त्रो भ॑वति॒ सर्व॑स्याभिजि॒त्यै ॥ [३९] ॥

(ते व्यावर्तन्त प्रवदिता स्यामिति स एतम्पञ्चरात्रमा संवँथ्सरो भिजित्यै) ॥ १० ॥

देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्यामा ददे इमामगृभ्णन् रशनामृतस्य पूर्व आयुषि विदथेषु कव्या। तया देवाः सुतमा बभूवुर् ऋतस्य सामन्थ्सरमारपन्ती॥ अभिधा असि भुवनमसि यन्ताऽसि धर्ताऽसि सोऽग्निर्वैश्वानरꣳ सप्रथसङ्गच्छ स्वाहाकृतः पृथिव्या-य्यँन्ता राड् यन्ताऽसि यमनो धर्ताऽसि धरुणः कृष्यै त्वा क्षेमाय त्वा रय्यै त्वा पोषाय त्वा पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा सते त्वाऽसते त्वाद्भ्यस्त्वौषधीभ्यस्त्वा विश्वेभ्यस्त्वा भूतेभ्यः ॥ [४०] ॥

(धरुणः पञ्चविꣳशतिश्च) ॥ ११ ॥

विभूर्मात्रा प्रभूः पित्राश्वोऽसि हयोऽस्यत्योऽसि नरोऽस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्यादित्यानाम्पत्वान्विह्यग्नये स्वाहा स्वाहेन्द्राग्निभ्याꣳ स्वाहा प्रजापतये स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा सर्वाभ्यो देवताभ्य इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहे ह रमतिः स्वाहा भूरसि भुवे त्वा भव्याय त्वा भविष्यते त्वा विश्वेभ्यस्त्वा भूतेभ्यो देवा आशापाला एतन्देवेभ्योऽश्वम्मेधाय प्रोक्षितङ्गोपायत ॥ [४१] ॥

(रन्तिः स्वाहा द्वाविꣳशतिश्च) ॥ १२ ॥

आयनाय स्वाहा प्रायणाय स्वाहोद्द्रावाय स्वाहोद्द्रुताय स्वाहा शूकाराय स्वाहा शूकृताय स्वाहा पलायिताय स्वाहाऽऽपलायिताय स्वाहाऽऽवल्गते स्वाहा परावल्गते स्वाहाऽऽयते स्वाहा प्रयते स्वाहा सर्वस्मै स्वाहा ॥ [४२] ॥

(आयनायोत्तरमापलायिताय षड्विꣳशतिः) ॥ १३ ॥

अग्नये स्वाहा सोमाय स्वाहा वायवे स्वाहाऽपाम्मोदाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहेन्द्राय स्वाहा बृहस्पतये स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ॥ [४३] ॥

(अग्नये वायवेऽपाम्मोदायेन्द्राय त्रयोविꣳशतिः) ॥ १४ ॥

पृथिव्यै स्वाहाऽन्तरिख्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नख्षत्रेभ्यः स्वाहा प्राच्यै दिशे स्वाहा दख्षिणायै दिशे स्वाहा प्रतीच्यै दिशे स्वाहोदीच्यै दिशे स्वाहोर्ध्वायै दिशे स्वाहा दिग्भ्यः स्वाहाऽवान्तरदिशाभ्यः स्वाहा समाभ्यः स्वाहा शरद्भ्यः स्वाहाऽहोरात्रेभ्यः स्वाहाऽर्धमासेभ्यः स्वाहा मासेभ्यः स्वाहर्तुभ्यः स्वाहा सँव्वथ्सराय स्वाहा सर्वस्मै स्वाहा ॥ [४४] ॥

(पृथिव्यै सूर्याय नख्षत्रेभ्यः प्राच्यै सप्तचत्वारिꣳशत्) ॥ १५ ॥

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहाऽपाम्मोदाय स्वाहा वायवे स्वाहा मित्राय स्वाहा वरुणाय स्वाहा सर्वस्मै स्वाहा ॥ [४५] ॥

(अग्नये सवित्रे पूष्णेऽपाम्मोदाय वायवे त्रयोविꣳशतिः) ॥ १६ ॥

पृथिव्यै स्वाहाऽन्तरिख्षाय स्वाहा दिवे स्वाहाऽग्नये स्वाहा सोमाय स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहाऽह्ने स्वाहा रात्रियै स्वाहर्जवे स्वाहा साधवे स्वाहा सुख्षित्यै स्वाहा ख्षुधे स्वाहाऽऽशितिम्ने स्वाहा रोगाय स्वाहा हिमाय स्वाहा शीताय स्वाहाऽऽतपाय स्वाहाऽरण्याय स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ [४६] ॥

(पृथिव्या अग्नयेऽह्ने रात्रियै चतुश्चत्वारिꣳशत्) ॥ १७ ॥

भुवो देवानाङ्कर्मणाऽपसर्तस्य पथ्याऽसि वसुभिर्देवेभिर्देवतया गायत्रेण त्वा छन्दसा युनज्मि वसन्तेन त्वर्तुना हविषा दीक्षयामि रुद्रेभिर्देवेभिर्देवतया त्रैष्टुभेन त्वा छन्दसा युनज्मि ग्रीष्मेण त्वर्तुना हविषा दीक्षयाम्यादित्येभिर्देवेभिर्देवतया जागतेन त्वा छन्दसा युनज्मि वर्षाभिस्त्वर्तुना हविषा दीक्षयामि विश्वेभिर्देवेभिर्देवतयाऽऽनुष्टुभेन त्वा छन्दसा युनज्मि ॥ [४७] ॥ शरदा त्वर्तुना हविषा दीक्षयाम्यङ्गिरोभिर्देवेभिर्देवतया पाङ्क्तेन त्वा छन्दसा युनज्मि हेमन्तशिशिराभ्यान्त्वर्तुना हविषा दीक्षयाम्याऽहन्दीक्षामरुहमृतस्य पत्नीङ्गायत्रेण छन्दसा ब्रह्मणा चर्तꣳ सत्येऽधाꣳ सत्यमृतेऽधाम्॥ मही मू षु >१सुत्रामाण >२मिह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा ॥ [४८] ॥

(आनुष्टुभेन त्वा छन्दसा युनज्म्ये कान्न पञ्चाशच्च) ॥ १८ ॥

---

ईकाराय स्वाहेङ्कृताय स्वाहा क्रन्दते स्वाहाऽवक्रन्दते स्वाहा प्रोथते स्वाहा प्रप्रोथते स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा सन्दीयमानाय स्वाहा सन्दिताय स्वाहा विचृत्यमानाय स्वाहा विचृत्ताय स्वाहा पलायिष्यमाणाय स्वाहा पलायिताय स्वाहोपरꣳस्यते स्वाहोपरताय स्वाहा निवेक्ष्यते स्वाहा निविशमानाय स्वाहा निविष्टाय स्वाहा निषथ्स्यते स्वाहा निषीदते स्वाहा निषण्णाय स्वाहा ॥ [४९] ॥ ऽऽसिष्यते स्वाहाऽऽसीनाय स्वाहाऽऽसिताय स्वाहा निपथ्स्यते स्वाहा निपद्यमानाय स्वाहा निपन्नाय स्वाहा शयिष्यते स्वाहा शयानाय स्वाहा शयिताय स्वाहा संमीलिष्यते स्वाहा समीलते स्वाहा संमीलिताय स्वाहा स्वफ्स्यते स्वाहा स्वपते स्वाहा सुप्ताय स्वाहा प्रभोथ्स्यते स्वाहा प्रबुद्ध्यमानाय स्वाहा प्रबुद्धाय स्वाहा जागरिष्यते स्वाहा जाग्रते स्वाहा जागरिताय स्वाहा शुश्रूषमाणाय स्वाहा शृण्वते स्वाहा श्रुताय स्वाहा वीक्षिष्यते स्वाहा ॥ [५०] ॥ वीक्षमाणाय स्वाहा वीक्षिताय स्वाहा सꣳहास्यते स्वाहा सजिहानाय स्वाहोज्जिहानाय स्वाहा विवर्थ्स्यते स्वाहा विवर्तमानाय स्वाहा विवृत्ताय स्वाहोत्थास्यते स्वाहोत्तिष्ठते स्वाहोत्थिताय स्वाहा विधविष्यते स्वाहा विधून्वानाय स्वाहा विधूताय स्वाहोत्क्रꣳस्यते स्वाहोत्क्रामते स्वाहोत्क्रान्ताय स्वाहा चङ्क्रमिष्यते स्वाहा चङ्क्रम्यमाणाय स्वाहा चङ्क्रमिताय स्वाहा कण्डूयिष्यते स्वाहा कण्डूयमानाय

स्वाहा कण्डूयिताय स्वाहा निकषिष्यते स्वाहा निकषमाणाय स्वाहा निकषिताय स्वाहा यदत्ति तस्मै स्वाहा यत् पिबति तस्मै स्वाहा यन्मेहति तस्मै स्वाहा यच्छकृत् करोति तस्मै स्वाहा रेतसे स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा सर्वस्मै स्वाहा ॥ [५१] ॥

(निषण्णाय स्वाहा वीरिख्षिष्यते स्वाहा निकषमाणाय स्वाहा सप्तविꣳशतिश्च) ॥ १९ ॥

---

अग्नये स्वाहा वायवे स्वाहा सूर्याय स्वाहर्तमस्यृतस्यर्तमसि सत्यमसि सत्यस्य सत्यमस्यृ-तस्य पन्था असि देवानाञ्छायाऽमृतस्य नाम तथ् सत्यय्ँयत् त्वम्प्रजापतिरस्यधि यदस्मिन् वाजिनीव शुभः स्पर्द्धन्ते दिवः सूर्येण विशोऽपो वृणानः पवते कव्यन् पशुन्न गोपा इर्यः परिज्मा ॥ [५२] ॥

(अग्नये वायवे सूर्याया ऽष्टाचत्वारिꣳशत्) ॥ २० ॥

---

## समाप्ति कोर्वैः

(प्रजननं प्रातस्सवने वै ब्रह्मवादिनः स त्वा अङ्गिरस आपो वै सोमो वै सहस्रतम्या त्रि र्जमदग्निः सँव्वथ्सरो देवस्य विभू रायनायाऽग्नये पृथिव्या अग्नये पृथिव्यै भुव ईकाराया ग्नये वायवे सूर्याय विꣳशतिः)
(प्रजनन मङ्गिरसः सोमो वै प्रतिगृह्णाति विभू वीरिख्षमाणाय द्विपञ्चाशत्)
(प्रजननं परिज्मा)

॥ हरिः ॐ ॥

सप्तमकाण्डे प्रथमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
| --- | --- |
| २० | ५२ |

ॐ